शिष्यक्रोधोह्यभीष्टः स्यादनिष्टोऽशिष्यरोषणः। यः क्रुध्यति चिरेणैव मृदुक्रोधो भवेदपि। वागृदण्डमात्रबन्धैश्च प्रतिषिद्धो न मुह्यति। अनुशाम्यति रोषाच्च स शिष्यक्रोधसंज्ञितः। इष्यते सर्व्वकार्य्येषु शुभजातिर्मतङ्गजः। यः क्रुध्यत्यचिरेणैव भृशक्रोधो भवेदपि। प्रतिषिद्धश्च वाग्दण्डतोत्त्रप्रजनकाङ्कुशैः। मुह्यत्येव चिरेणापि रोषाद्विरतिमेति च। अशिष्यक्रोधसंज्ञोऽसौ विज्ञेयो वारणाधमः” इति कोपः। विस्तरस्तु पालकाव्यादौ दृश्यः।

**इभकणा** स्त्री॰ इभोपपदा कणा शाक॰त॰। गजपिप्पल्याम्।

**इभकेशर** पु॰ इभमद इव केशरोऽस्य। नागकेशरे “शृङ्गाटकाब्जगुप्तेभकेशरागुरुचन्दनैः” सुश्रु॰।

**इभगन्धा** स्त्री इभस्य गन्ध एकदेशोदन्त इव पुष्पमस्याः। नागदन्त्याम्, सा च स्थावरविषभेदः यथा सुश्रुते “मूलं पत्रं फलं पुष्पं त्वक्क्षीरं सारएव च। निर्य्यासो धातवश्चैव कन्दश्च दशमः स्मृतः” इत्युपक्रम्य “कुमुद्वतीरेणुकाकरम्भमहाकरम्भकर्कोटकरेणुकखद्योतकचर्म्मरीभगन्धा सर्पघातिनन्दनसारपाकादीनि द्वादश फलविषाणि” इति विभज्य “शुष्कशोफः फलविषैर्दाहोऽन्नद्वेष एव चेति” तद्विकारो दर्शितः।

**इभदन्ता** स्त्री इभस्य दन्तइव शुभ्रं पुष्पमस्याः। गजदन्तशुभ्रपुष्पवत्यां १नागदन्त्याम्, सा च स्थावरफलविषा।

**इभनिमीलिका** स्त्री इभं हस्तिनमपि निमीलयति सेवनात् निद्रापयति। १भङ्गायाम्। इभस्येव निमीलिका। २वैदग्ध्याम्

**इभपालक** पु॰ इभं पालयति। (माहुत) हस्तिपके।

**इभपोटा** स्त्री पोटा पुंलक्षणा इभी परनिपातः पुंवद्भावश्च। पुंगजलक्षणयुक्तायां हस्तिन्याम्।

**इभमर** पु॰ ६त॰। गजसमूहे [सिंहे।

**इभमाचल** पु॰ इभमाचलयति आ+चल-णिच्—बा॰ख।

**इभया** स्त्री इभैर्यायते भक्ष्यतया प्राप्यते या-कर्मणि घञर्थे क ३त॰। स्वर्णक्षीरीदृक्षे रत्नमाला इभषेति वा पाठः।

**इभयुवति** स्त्री युवतिरिभी पूर्वनि॰ पुंवद्भावश्च। युवत्यां हस्तिन्याम् वा ङीप्।

**इभाख्य** पु॰ इभस्याख्याख्या यस्य। नागकेशरे त्रिका॰।

**इभानन** पु॰ इभस्याननमेवाननं यस्य। गजानने गणेशे तस्य यथा तदाननत्वं तथोक्तं “स्वयं गोलकनाथस्य पुराणकस्य प्रभावतः। पार्व्वतीगर्भजातश्च तव पुत्रो भविष्यति। स्वयं देवगणानाञ्च यस्मादीशः कृपानिधिः। गणेश इति विख्यातो भविष्यति जगत्त्रये। “शनिदृष्ट्या शिरश्छेदात् गजवक्त्रेण योजितः। गजाननः शिशुस्तेन नियतिः केन बाध्यते” ब्रह्मवै पु॰ ६अ॰। शनिदृष्ट्या तच्छिरश्छेदकथा तत्रैव १२अ॰। “पार्व्वतीवचनं श्रुत्वा सोऽनुमेने हृदा स्वयम्। पश्यामि किं न पश्यामि पार्व्वतीसुतमित्यहो। यदि बालो मया दृष्टस्तस्य विघ्नो भवेद्ध्रुवम्। अन्यथा मे प्रलापस्तत्परतः स्वात्मरणम्। इत्यालोच्य च धर्म्मिष्ठो धर्मं कृत्वा स्वसाक्षिणम्। बालं द्रष्टुं मनश्चक्रे न बालमातरं शनिः। विषसमानसः पूर्वं शुष्ककण्ठोष्ठतालुकः। सव्यलोचनकोणेन ददर्श च शिशोर्मुखम्। शनिश्च दृष्टिमात्रेण चिच्छेद मस्तकं मुने!। चक्षुर्निवारयामास तस्थौ नम्राननः शनिः” एवं शिरश्छेदमुक्त्वा। “तान् सर्व्वान् मूर्च्छितान् दृष्ट्वा चारुह्य गरुड़ं हरिः। जगाम पुष्पभद्रां स उत्तरस्यां दिशि स्थिताम्। पुष्पभद्रानदीतीरे ददर्श काननस्थितम्। गजेन्द्रं निद्रितं तत्र शयानं हस्तिनीयुतम्। दिश्युत्तरस्यां शिरसं मूर्च्छितं सुरतश्रमात्। परितः शावकान् कृत्वा परमानन्दमानसम्। शीघ्रं सुदर्शनेनैव चिच्छेद तच्छिरो मुदा। स्थापयामास गरुड़े रुधिराक्तं मनोहरम्”। गजशिरश्छेदमुक्त्वा तत्पत्न्या स्तुतेन हरिणा तस्य कल्पान्तजीवनं वरोदत्त इत्युपवर्ण्य। “आगत्य बालकस्थानं बालं कृत्वाऽथ वक्षसि। रुचिरं तच्छिरः कृत्वा योजयामास बालके। ब्रह्मस्वरूपी भगवान् ब्रह्मज्ञानेन लीलया। जीवनं योजयाभास हुङ्कारोच्चारणेन च। पार्व्वतीं बोधयित्वा तु दत्त्वा क्रोड़े च तं शिशुम्। बोधयामास तां नाथ आध्यात्मिकविबोधनैः” “सेनाचरीभवदिभाननदानवारिवासेन यस्य जनितासुरभीरणश्रीः” नैष॰। इभवक्त्रेभमुखगजाननादयोऽप्यत्र। “तं नमामि गजाननम्” माधवः।

**इभारि** पु॰ ६त॰। सिंहे इभामित्रादयोऽप्यत्र। [शब्दच॰।

**इभोषणा** स्त्री इभोपपदा उषणा शाक॰त॰। गजपिप्पल्यां

**इभ्य** त्रि॰ इभं गजमर्हति दण्डा॰ यत्। १प्रचुरगजादिधनाढ्ये २नृपे ३हस्तिपके च पु॰। “उषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक उवास” छा॰उ॰ तस्य भाष्ये इभो हस्ती तमर्हतीतीभ्य ईश्वरो हस्त्यारोहोवेति। “जामिः सिन्धूनां भ्रातेव स्वस्रामिभ्यान्न राजा वनान्यत्ति” ऋ॰१, ६५,४, स्वार्थे कन्। इभ्यकस्तत्रैव स्त्रियान्तु टापि वा अत इत्त्वम् इभ्यका-इभ्यिका। इनाढ्यायां स्त्रियाम्।

**इभ्यतिल्विल** त्रि॰इभ्यस्तिल्विलः पुष्टइव। गजादिभिः प्रचुरे आढ्ये। “यदि प्रतीचीयादिभ्यतिल्विल इव धान्यति-